## द्वितीयः पाठः

# कालबोधः

**शिष्यः** — महोदय! रात्रिदिवसयोः विभाजनं कथं भवति?

**गुरुः** — पृथ्वी गोलाकारा विद्यते। एषा अहर्निशं केन्द्रे परिभ्रमति। यदा अस्याः यः भागः सूर्यस्य सम्मुखे भवति तत्र सूर्यस्य किरणाः पतन्ति तदा दिनं जायते। यस्मिन् भागे किरणाः न पतन्ति तत्र अन्धकारः भवति रात्रिश्च जायते। सूर्यः प्रातः पूर्वस्यां दिशि उदेति सायं च पश्चिमदिशि अस्तं गच्छति। एवं सूर्यस्य उदयानन्तरं दिनस्य अस्तानन्तरं च रात्रेः ज्ञानं भवति। दिवानिशानुसारमेव जनाः विविधाः क्रियाः सम्पादयन्ति।

**शिष्यः** — सप्ताहे कति दिनानि भवन्ति?

**गुरुः** — सप्ताहे सप्त दिनानि भवन्ति। तेषां नामानि तु—रविवासरः, सोमवासरः, मङ्गलवासरः, बुधवासरः, गुरुवासरः, शुक्रवासरः, शनिवासरः चेति।

**शिष्यः** — वर्षे कति मासाः भवन्ति?

**गुरुः** — वर्षे द्वादश मासाः भवन्ति। तेषां नामानि तु— चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्विनः, कार्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनः चेति।

**शिष्यः** — तिथयः कति भवन्ति?

**गुरुः** — प्रतिपक्षं तिथयः पञ्चदश भवन्ति। यथा- प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा, अमावस्या वा।

मासे द्वौ पक्षौ भवतः शुक्लपक्षः, कृष्णपक्षः चेति। शुक्लपक्षे पूर्णिमा कृष्णपक्षे च अमावस्या भवति। शुक्लपक्षे चन्द्रः क्रमशः वर्धते। पूर्णिमायां सः पूर्णतां प्राप्नोति। सः पञ्चदशभिः कलाभिः पूर्णः भवति। कृष्णपक्षे च क्रमशः क्षयं प्राप्नोति। प्रतिदिनं तस्य एका कला क्षीयते। अमावस्यायां सः पूर्णरूपेण लुप्तः भवति।

**शिष्यः** — वर्षे कति ऋतवः भवन्ति?

**गुरुः** — चैत्रवैशाखयोः - वसन्तः, ज्येष्ठाषाढयोः - ग्रीष्मः, श्रावणभाद्रपदयोः - वर्षा, आश्विनकार्तिकयोः - शरद्, मार्गशीर्षपौषयोः - हेमन्तः, माघफाल्गुनयोः - शिशिरः एवं षड् ऋतवः भवन्ति। शिष्य! एकादशतः विंशतिपर्यन्तं सङ्ख्यां गणय।

**शिष्यः** – आम्। एकादश, द्वादश, त्रयोदश, चतुर्दश, पञ्चदश, षोडश, सप्तदश, अष्टादश, नवदश, विंशतिः।

**गुरुः** – साधु वत्स! सम्यगुक्तम्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अहर्निशम् | = दिन-रात | पक्षः | = पखवारा (महीने का आधा भाग) |
| क्षयम् | = नाश, हानि को | कला | = शोभा (चन्द्रमा की कला) |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**
   - (क) सप्ताहे कति दिनानि भवन्ति?
   - (ख) कति तिथयः भवन्ति?
   - (ग) सूर्यः कस्यां दिशि उदेति?
   - (घ) वर्षे कति मासाः भवन्ति?
   - (ङ) चैत्रवैशाखयोः कः ऋतुः भवति?

2. **एकवाक्येन उत्तरं लिखत–**
   - (क) माघफाल्गुनयोः कः ऋतुः भवति?
   - (ख) चन्द्रः कदा पूर्णतां प्राप्नोति?
   - (ग) अमावस्या कस्मिन् पक्षे भवति?
   - (घ) कौ द्वौ पक्षौ भवतः?

3. **समुचितं युग्मनिर्माणं कुरुत –**

| | (अ) | (ब) |
|---|---|---|
| (क) | श्रावणमासे | ग्रीष्मः |
| (ख) | मार्गशीर्षमासे | शरद् |
| (ग) | चैत्रमासे | शिशिरः |
| (घ) | आषाढमासे | वर्षा |
| (ङ) | फाल्गुनमासे | वसन्तः |
| (च) | कार्तिकमासे | हेमन्तः |

4. **अधोलिखितेषु समुचितं पदं चित्वा रिक्तस्थानानि पूरयत –**

(क) शुक्लपक्षे ............ तिथिः भवति। (अमावस्या/पूर्णिमा)

(ख) ज्येष्ठमासानन्तरम् .......... मासः भवति। (श्रावणः/आषाढः)

(ग) सप्ताहे .......... दिनानि भवन्ति। (नव/सप्त)

(घ) शुक्लपक्षे चन्द्रः क्रमशः ............। (क्षीयते/वर्धते)

(ङ) पक्षे तिथयः .......... भवन्ति। (षोडश/पञ्चदश)

5. **निम्नलिखितशब्दानां पर्यायशब्दान् लिखत–**

**यथा-** सूर्यः – रविः भानुः

(क) चन्द्रः – ............. .............

(ख) पृथ्वी – ............. .............

(ग) वासरः – ............. .............

(घ) निशा – ............. .............

6. **पाठे आगतान् अव्ययशब्दान् चित्वा पञ्चवाक्यानि लिखत–**

यथा - 'च' अव्ययम् - मासे शुक्लपक्षः कृष्णपक्षः च भवतः।

7. **रिक्तस्थानानि पूरयत (नामानि क्रमेण लिखत)–**

(क) वसन्तः .............. वर्षा ................. ................. शिशिरः।

(ख) शनिवासरः ................. .......... मङ्गलवासरः............ ......... ..........।

(ग) चैत्रः ........... ........... आषाढः ........... ........... आश्विनः ........... ........... पौषः ........... ...........

(घ) ........... द्वादश ........... ........... पञ्चदश ........... ........... ..........नवदश ...........।

(ङ) प्रतिपदा ........... ........... ........... पञ्चमी ........... ........... ........... नवमी ........... ........... ........... त्रयोदशी ........... अमावस्या।

**योग्यताविस्तारः –**

- "तिथि" शब्दस्य "कला" शब्दस्य च शब्दरूपाणि कण्ठस्थं कुरुत।

*चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ।*